# Shri Shivakamasundari Trishati Nama Stotram

# श्रीशिवकामसुन्दरीत्रिशतीनामस्तोत्रम्

## Document Information

Text title : Shri Shivakamasundari Trishati Nama Stotram

File name : shivakAmasundarItrishatanAmastotram.itx

Category : devii, trishatI, devI, pArvatI

Location : doc_devii

Transliterated by : NA

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Latest update : May 11, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# श्रीशिवकामसुन्दरीत्रिशतीनामस्तोत्रम्

पूर्वपीठिका

कैलासमध्यशृङ्गाग्रे कल्पवृक्षादिसङ्कुले ।
नानामृगगणाकीर्णे मन्दमारुतवीजिते ॥ १॥

पक्षिवृन्दरवोद्भूतमदनाधिक्यवैभवे ।
शृङ्गारविपिने यासा पद्माकरसरस्तटे ॥ २॥

चिन्तामणिशिलाक्लृप्तहर्म्यप्राकारशोभिते ।
मणिमण्डपमध्ये च दिव्यसिंहासने शुभे ॥ ३॥

आसीनं लीलया जातु महादेवं स्मिताननम् ।
प्रणिपत्य मुदा गौरी प्रोवाच वचनं मधु ॥ ४॥

श्रीगौर्युवाच

देवदेव महादेव नाथ सर्वज्ञ सर्वग ।
लोके व्याधिदरिद्राद्यैः पिशाचाद्यैश्च पीडिताः ॥ ५॥

सर्वे जनाः कथं तेभ्यो मुच्येरन् परमेश्वर ।
तदुपायं वदेशान लोकान् उद्धर्तुं आदरात् ॥ ६॥

इति पृष्टो गिरिजया शिवः सङ्कल्पवर्जितः ।
भद्रे साधु त्वया पृष्टं सर्वलोकहिताय माम् ॥ ७॥

वक्ष्याम्युपायं दारिद्र्यभयव्याधिविनाशनम् ।
धनधान्यायुरारोग्य-धर्मकामार्थमोक्षदम् ॥ ८॥

विद्याकीर्तिकरं नृणां पठनादस्य सिद्धिदम् ।
नाम्नां त्रिशतसङ्ख्याकं स्तोत्रं मन्त्राक्षराङ्कितम् ॥ ९॥

शिवकामसुन्दरीदेव्याः शिवायाः परमेश्वरि ।
कथयामि तव स्नेहान्न प्रकाश्यं कदाचन ॥ १०॥

गोपनीयं प्रयत्नेन मर्मस्थलवदीश्वरि ।
शिरोऽपि दातुं युक्तं हि न तद्दातुं प्रयत्नतः ॥ ११॥

ऋषिर्ब्रह्माऽस्य गायत्रीच्छन्दः श्रीसुन्दरी शिवा ।
सहस्रनामवत्सर्वं कराङ्गन्यासकौ चरेत् ॥ १२॥

देवता कथिता चास्य स्तोत्रस्य हि वरानने ।
जितेन्द्रियो जितक्रोधश्चिन्तयेत् सुन्दरीं हृदि ॥ १३॥

॥ ध्यानम् ॥

उद्यद्भास्करसन्निभां द्विनयनां हेमानानाब्जां चतु-
र्हस्तैरम्बुजस्रक्शुकं कटिकरं सम्बिभ्रतीं शूलिनः ।
नृत्ताडम्बरधूर्वहां शिवमयीं पद्मासनाध्यासिनीं
ध्यायेऽहं परमेश्वरीं हृदि सदा श्रीब्रह्मजायां शिवाम् ॥ १४॥

शिवकामसुन्दरीं श्यामां शिवां शिवकरीं शुभाम् ।
शिवकामकोष्ठनिलयां ध्यायेऽहं शिवमोहिनीम् ॥ १५॥

चिन्तितार्थफलदायिनीमुमां चित्तरङ्गतलनित्यवासिनीम् ।
चित्सभेश महिषीं सदाशिवां चिन्तयामि शिवकामसुन्दरीम् ॥ १६॥

इति ध्यात्वा महादेवीं मनसाभ्यर्च्य साधकः ।
लमित्यादिमवर्णैश्च पञ्च पूजाः ततः परम् ॥

ततः पठेत्स्तोत्रराजं सर्वसौभाग्यवर्धकम् ॥ १७॥

अथ त्रिशतनामस्तोत्रम् ।
ओतप्रोताण्डनिवहाऽप्योजस्वत्योघपूजिता ।
ओङ्कारगृहकर्पूरदीपिका चौदनप्रिया ॥ १॥

ओङ्कारपञ्जरशुकी चोङ्कारमनुवादिनी ।
ओङ्कारमध्यनिलयाऽप्योजोनाथसमर्चिता ॥ २॥

ओङ्कारवाच्या चोङ्कारमुख्या चोङ्काररूपिणी ।
ओङ्कारशुक्तिकामुक्तामणिश्चोङ्कारशब्दिता ॥ ३॥

चक्रहस्ता चतुर्वेदवेद्या चामीकरासना ।
चक्रायितसखीवृन्दा चन्द्रमण्डलमध्यगा ॥ ४॥

चञ्चग्रजितबिम्बाभशुकसङ्गीतमोदिनी ।

चण्डकोदण्डनिर्मुक्तबाणच्छन्नदिगन्तरा ॥ ५॥

चण्डकोपारुणमुखी चण्डभैरवमोहिनी ।
चण्डताण्डवपाण्डित्यप्रकाशनपटीयसी ॥ ६॥

चण्डनागपरीताङ्गी चण्डदैत्यशिरोहरा ।
चण्डमार्त्ताण्डधिक्कारिचन्द्रहासकराम्बुजा ॥ ७॥

चण्डरावशिवावृन्दनिर्जिताम्भोधिनिस्स्वना ।
चतुराननसम्पूज्या चतुरा चतुरार्चिता ॥ ८॥

चन्द्रिकासितदंष्ट्राग्रा चन्दनद्रवभूषिता ।
चम्पकाशोकपुन्नागपुष्पमालालसत्कचा ॥ ९॥

चराचरोद्भवा चारुहासा चर्माम्बरप्रिया ।
चापबाणगदाखड्गशङ्खचक्रलसत्करा ॥ १०॥

चामरग्राहिणीवाणीरमेन्द्राणीसमावृता ।
चामुण्डा चण्डिका चण्डमुण्डासुरविनाशिनी ॥ ११॥

चारुहीरमणीभास्वत्किरीटा चक्रवर्तिनी ।
चित्रलेखा चित्ररथा चित्रलेखापितृ(पती)डिता ॥ १२॥

चित्रसेनस्तुता चित्रयुद्धनिर्जितदानवा ।
चित्रांशुका चित्रकर्मा चित्रानक्षत्रपूजिता ॥ १३॥

चिदानन्दप्रदा चित्रा चित्रनृत्तपरायणा ।
चिन्ताधिकप्रदा चिन्त्या चिदम्बरनिवासिनी ॥ १४॥

चिरञ्जीविसमाराध्या चिन्मयी चिद्विलासिनी ।
चिरन्तनी चिदाकाशमध्यगा चित्स्वरूपिणी ॥ १५॥

चिम्बीजा चणकप्रीता चणन्नूपुरपादुका ।
डाकिनी डमरुस्वानभीषणा डाकिनीश्वरी ॥ १६॥

डाडिमीकुसुमप्रीता डाडिमीमधुलम्पटा ।
डामरी डामरीतन्त्ररूपा डुण्डिसमर्चिता ॥ १७॥

डामरीमुख्यशक्त्यौघपरिष्कृतनिकेतना ।
डम्बाडम्बमनोहारी डिम्बोन्मत्तविनाशिनी ॥ १८॥

ढक्काध्वनिसमुत्पन्नशब्दसर्वस्वतन्त्रिणी ।
ढक्कानिनदसम्मुह्यद्देवराजाभयङ्करी ॥ १९॥

नकुलीध्वस्तनागालिर्नकुली नकुलेश्वरी ।
नखाग्रविलसद्विष्णुदशाकारा नटेश्वरी ॥ २०॥

नटराजाङ्गना नाट्यकोविदा नागरार्चिता ।
नम्रदिक्पालवनिता नमदानन्ददायिनी ॥ २१॥

नरकत्राणनोद्युक्ता नन्द्यावर्तसुमप्रिया ।
नरसिंहगलोन्मुक्तरुधिरास्वादनप्रिया ॥ २२॥

नागकन्यापरिवृता नागासुरविमर्दिनी ।
नागाननसुता नागवाहा नरशवासना ॥ २३॥

नाद ब्रह्ममयी नित्यनिर्वाणसुखदायिनी ।
नाममन्त्रजपप्रीतिकारिणी नागभूषणा ॥ २४॥

नामरूपधरा नानावेदशास्त्रार्थदर्शिनी ।
नारायणी नामरूपवर्जिता नरवाहना ॥ २५॥

नारी नरेन्द्रसम्पूज्या नगराजनिकेतना ।
नालीकलोचना नन्दिविद्या नगसुता नटी ॥ २६॥

नासास्तब्धमरुच्चण्डवेगा नगरपालिनी ।
निर्मला निरहङ्कारा निजभक्ताखिलेष्टदा ॥ २७॥

निस्सारा नियतिर्नित्या निर्लोभा निरवग्रहा ।
नौकारूढा नीतसुधावार्धिभक्तजनप्रिया ॥ २८॥

वृन्दानाथशिरोहर्त्री वृन्दामोहितमाधवा ।
वृन्दारकवधूवृन्दसेनास्तिमिततापसा ॥ २९॥

वृन्दारकारिदर्पघ्नी बृहत्सेनासमावृता ।
वृन्दारकेशविलसद्वेणुनादकृतादरा ॥ ३०॥

बृहच्छूलशिरः प्रोतशुम्भदैत्यभयङ्करी ।
बृहतीक्वणनोद्युक्तनारदर्षिसमर्चिता ॥ ३१॥

बृहन्मद्दलभृच्चक्रपाणिसन्नुतवैभवा ।
बृहस्पतिसमाराध्या ब्राह्मी ब्रह्मैक्यरूपिणी ॥ ३२॥

ब्रह्मजा बृहदैश्वर्यदायिनी ब्रूम्मनुप्रिया ।
ब्रह्मजाया ब्रह्मबीजा ब्रह्माणी ब्रह्मवादिनी ॥ ३३॥

ब्रह्मज्ञा ब्रह्मजननी ब्रह्मज्ञानप्रदायिनी ।
ब्रह्मदेवलयासक्तताण्डवोद्दण्डपण्डिता ॥ ३४॥

ब्रह्मपञ्चकसंरूढा ब्रह्माण्डान्तकराम्बुजा ।
ब्रह्ममाया ब्रह्मशीर्षमालामण्डनमण्डिता ॥ ३५॥

ब्रह्मयज्ञपराधीनहृदया ब्रह्मवित्प्रिया ।
ब्रह्मविद्या बृहद्रूपा बृहती ब्राह्मणप्रिया ॥ ३६॥

ब्रह्मविष्णुमुखोद्गीतवैभवा ब्राह्मणार्चिता ।
ब्रह्मशीर्षहरा ब्रह्मकपालवरधारिणी ॥ ३७॥

ब्रह्महीनमखासक्तदक्षमुख्यविनाकृता ।
ब्रह्माण्डनिवहोद्भेदताण्डवेश्वरवादिनी ॥ ३८॥

ब्रह्माण्डसाक्षिणी ब्रह्ममोदिनी ब्रह्म एव च ।
ब्राह्मी माहेश्वरीमुख्यशक्तिव्याप्त सभाङ्गणा ॥ ३९॥

मदिरास्वादरसिका मधुरा मधुवैरिणी ।
मनोतिगा मनोगम्या मतङ्गतनया मधुः ॥ ४०॥

मनोवागपरिच्छिन्ना महात्रिपुरसुन्दरी ।
मन्त्रिणी मन्त्रतन्त्रज्ञा महागायत्रिरूपिणी ॥ ४१॥

महती मदनानन्दकारिणी मनुपूजिता ।
महनीया मही मन्दगमना मधुरस्वना ॥ ४२॥

महर्षिगणसम्पूज्या महाराज्ञी मनोन्मनी ।
महाकाली महालक्ष्मीः महावाणी महाकृतिः ॥ ४३॥

महादेवाङ्कपर्यङ्का महावाक्यार्थगोचरा ।
महादेवी महोत्साहा मरालीगतिदेशिका ॥ ४४॥

महामणिघटाकारकिरीटा मञ्जुभाषिणी ।
महामाया महाघोरस्वप्नवाराहिरूपिणी ॥ ४५॥

महामारी महातिल्ववनमध्यनिकेतना ।

महाश्मशाननटनरसिका मधुपायिनी ॥ ४६॥

महिमालब्धसिद्धीन्द्रमुख्यादृष्टस्वरूपिणी ।
माणिक्यवीणासंलापा मारान्तकविमोहिनी ॥ ४७॥

माणिभद्रस्तुता मान्या मानिनी मानवर्जिता ।
माध्यन्दिनफणीशानजैमिनिस्तुतनर्तना ॥ ४८॥

मारी मातङ्गिनी माता महाशैलशरीरजा ।
मांसपूजापरा मांसभक्षिणी माषलम्पटा ॥ ४९॥

माहेन्द्रजालचतुरा महादुर्गा महेश्वरी ।
मीनाक्षी मिथुनाकारा मदनी मादिपञ्चका ॥ ५०॥

मुकुन्दसहजा मुद्रामुख्या मूकत्वनाशिनी ।
मुक्ताहारलसद्ग्रीवा मुचुकुन्दनृपार्चिता ॥ ५१॥

मुदिता मुण्डशयनी मुक्तिदा मुरशासना ।
मूर्ता मूर्खत्वशमनी मूलविद्यास्वरूपिणी ॥ ५२॥

मूलाधारादिषट्चक्रनिलया मूलमन्त्रवित् ।
मूम्बीजा मूर्धसम्बद्धपुष्पमालाविराजिता ॥ ५३॥

मृडानी मृगयासक्ता मृगेन्द्रार्द्राजिनच्छदा ।
मोहान्धकारमार्ताण्डा मोक्षदानपरायणा ॥ ५४॥

मोदिनीपृष्टवाग्देवताष्टकस्तुतवैभवा ।
शिवकामसुन्दरी देवी शिवदा शिववामगा ॥ ५५॥

हयाननमुखोद्भूतपुराणमहिमोज्ज्वला ।
हयारूढादिसंसेव्या हीरदंष्ट्रा हलायुधा ॥ ५६॥

हरमानससम्मोहशृङ्गाररसवारिधिः ।
हरलीलाविनोदज्ञा हारिणी हरिणेक्षणा ॥ ५७॥

हराग्निदग्धकन्दर्पजीवनापाङ्गलोचना ।
हरार्धाङ्गहरा हेयदेयोपादेयवर्जिता ॥ ५८॥

हराङ्कनिलया हृद्या हृदयाकाशमध्यगा ।
हरिणाङ्कधरा हादिविद्या हरिसहोदरी ॥ ५९॥

हरिद्राचूर्णसम्पूर्णचरणा ह्रीम्मनुप्रिया ।
हरिनाभिसरोजोद्यत्पद्म संस्तुतयोगिनी ॥ ६०॥

हरिब्रह्मादिमकुटनीराजितपदाम्बुजा ।
हरिब्रह्मेन्द्रविनुता हेलानिर्जितदानवा ॥ ६१॥

हरिशङ्करसम्मुह्यद्दारुकारण्यतापसा ।
हरेन्द्वमृतसञ्जीवद्ब्रह्मशीर्षालिगायका ॥ ६२॥

हर्यक्षवाहनारूढा हेलाकलितविग्रहा ।
हाकिनी हलिकृष्णेड्या हंसमन्त्रस्वरूपिणी ॥ ६३॥

हारायितफणीरत्नन प्रभाजितहिमांशुका ।
हालाहलाग्निसन्तप्तदेवत्राणामृतेश्वरी ॥ ६४॥

हासोद्यत्कालिकाभुक्तरक्तबीजासुरा हरा ।
हाहाकाररवाक्रन्दन्महिषासुरमर्दिनी ॥ ६५॥

हिमाद्रितनया हंसवाहा हानिविवर्जिता ।
हेमघण्टालिझङ्कारजितकल्पाशनिध्वनिः ॥ ६६॥

हेमपद्मधरा हस्तचतुरा हेमकञ्चुकी ।
हेमाद्रितुङ्गशृङ्गाग्रमणिमण्डपमध्यगा ॥

ह्रीम्बीजेत्यन्तनाम्नां च त्रिशतं कथितं तव ॥ ६७॥

उत्तरपीठिका

शिवकामसुन्दरीनामान्येतानि शुभदानि हि ।
सर्वसौभाग्यदं पुण्यं विघ्नध्वान्तनभोमणिम् ॥ ६८॥

आयुष्करं कीर्तिकरं तुष्टिदं पुष्टिदं प्रिये ।
विद्याबुद्धिप्रदं नृणां सकृत्स्मरणमात्रतः ॥ ६९॥

यो जपित्वा महामन्त्रं शिवकाम्याः सहस्रकम् ।
त्रिशतं वा यथाशक्ति पठेत्सर्वार्थदायकम् ॥ ७०॥

यदिष्टं सा ददात्येव सद्य एव न संशयः ।
शुक्रवारे तथा भौमवारे पर्वणि वा प्रिये ॥ ७१॥

कृष्णाङ्गारचतुर्दश्यामष्टम्यां च विशेषतः ।
पद्मैर्वाऽन्यसुमैर्बिल्वैर्हरिद्राकुङ्कुमैः प्रिये ॥ ७२॥

एभिः समर्चयेद्देवीं नामभिः साधकोत्तमः ।
मूर्तौ वा यन्त्रराजे वा घटे वाऽऽवाह्य सुन्दरीम् ॥ ७३॥

अचिरादेव विन्देत वागीशत्वं सुलोचने ।
श्रीशत्वं सर्वसिद्धीनां नायकत्वं लभेद् ध्रुवम् ॥ ७४॥

भूतप्रेतपिशाचानां स्मरणाद् भीतिकारणम् ।
यो विप्रश्शान्तहृदयो नित्यं निष्कामनायुतः ॥ ७५॥

आवर्तयेदिदं स्तोत्रं तस्य श्रीमत्कृपाबलात् ।
इह भुक्त्वाऽखिलान् भोगान् सोऽन्ते जन्मादिवर्जितम् ॥ ७६ ॥

जीवब्रह्मैक्यचिद्रूपपदं प्राप्नोत्यसंशयः ।
एतत्स्तोत्रोपमं स्तोत्रं नान्यदस्ति हि सुव्रते ॥ ७७॥

मयापि तत्फलं वक्तुं न शक्यं केन वा शिवे ।
तस्मादिदं गोपनीयं च प्रकाश्यं प्रयत्नतः ।
किं भूयश्श्रोतुकामासि शृङ्गाराब्धिसुधाकरे ॥ ७८॥

इति भृङ्गिरिटिसंहितायां शक्त्युत्कर्षप्रकरणे शिवगौरीसंवादे
श्री शिवकामसुन्दरीत्रिशतनामस्तोत्रं सम्पूर्णम् ॥

Proofread by Aruna Narayanan

*Shri Shivakamasundari Trishati Nama Stotram*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*